श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ प्रयत्नस्तबकः ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रयत्नस्तबकः ॥

श्रीनिवासस्य महिषीं श्रेयसे तामुपास्महे।
यदर्थमेव विदधे यत्नं भूयांसमच्युतः॥ १ ॥

कमले कमलेक्षणस्त्वदर्थे कठिनं कर्म करोत्यसौ न किं वा।
कलशोदधिमन्थनप्रयासादपरं किं श्रमदायि कर्म लोके॥ २ ॥

तव गुरुस्तनशैलभरं सदा जननि वोढुमना जगतां पिता।
गुरुभरोद्वहनाभ्यसनाय किं तमपि मन्दरमम्बुनिधौ दधौ॥ ३ ॥

नादत्तमध्यवनि सिध्यति किञ्चनेति
    निश्चिन्वता भगवतापि विवक्षता त्वाम्।
वैदेहि कामपि शिलामबलां विधाय
    कन्याप्रदानविधिरक्षपदाय चक्रे॥ ४ ॥

विद्यां बलां रघुपतिः पथि गाधिपुत्रात्
    सम्प्राप्य निह्नुतसमस्ततनुक्लमोऽपि।
अम्बातनुक्लमहरामबलामिह त्वां
    स्वस्य ध्रुवं घटयितुं तमुपास्त भूयः॥ ५ ॥

शंसन्ति पङ्क्तिरथयागविधेः फलं किं
    सोऽयं मखावनिभवां जनकात्मजे त्वाम्।
प्राप्तुं व्यधात् कुशिकनन्दनयज्ञरक्षां
    रक्षांसि हन्त दमयन् युधि रामचन्द्रः॥ ६ ॥

भगवति क्षितिपुत्रि भवत्कृते भवहरोऽपि भवन् रघुनन्दनः।
समभवद् भवचापलतान्तधीः स इति विस्मयवन्त इहास्महे॥ ७ ॥

त्वद्भ्रूभटस्य धनुषा विजितः सुमेषो रामस्तमेव नितरामभिराद्धुकामः।
तत्प्रीतये जनकनन्दिनि तद्विपक्ष कोदण्डभङ्गमुपहारमिवाजहार॥ ८॥

कर्तव्ये जनकेन मैथिलि तवोद्वाहक्रमालोचने
सोऽयं वागुपकारमारचयितेत्यालोच्य भाविस्थितिम्।
तद्वंशैकपुरोहितस्य हि शतानन्दस्य हर्षाय त-
न्मातुर्ग्रावदशां हरन् रघुपतिस्तस्योपकारं व्यधात्॥ ९॥

सुन्दस्त्रीतनुभूसुबाहुकुहनोपज्ञं तु यज्ञक्रिया
प्रत्यूहं शमयन् प्रहर्षघटकं शुश्रूषयन् कौशिकम्।
दुर्दर्शं शशिखण्डमण्डनमहादोर्दण्डकोदण्डम-
प्युर्वीनन्दिनि खण्डयन्नुदवहत्त्वामम्ब रामः श्रमात्॥ १०॥

त्वां मार्गमाणस्त्वदुदन्तशंसिने वृद्धाय गृध्राय रमे रघूद्वहः।
योग्येकयोग्यानि पदान्यहोऽदिशत् सन्तोऽपि वेलामतियन्ति रागतः॥ ११॥

अपि सकलशरण्यो मानिनामग्रगण्यो
भगवति भवदर्थे भानुवंशाधिनाथः।
कपिमपि शरणोत्कः कञ्चिदानर्च कष्टं
गणयति न फलार्थी गौरवं लाघवं वा॥ १२॥

त्वद्दाने जनकेन मैथिलि पुरा शुल्कीकृतं स्वामिनः
पाण्यङ्गुष्ठकिणं व्यधात् पशुपतेश्चापे गुणारोपणम्।
त्वत्संप्राप्ति सहाय वानरपति प्रत्यायनार्थं त्वभूत्
पादाङ्गुष्ठकिणाय दुन्दुभितनोस्तद् दूरतः क्षेपणम्॥ १३॥

निशिचरपतिमन्तं नेष्यता तद्गृहीतां
पुनरवनिसुते त्वां प्रेप्सता राघवेण।
तरणिजमभिराद्धुं तत्र कार्ये सहायं
सपदि निरपराधः सादितो हन्त वाली॥ १४॥

परोरजसि धामनि श्रुतिशिरोभुवि च्छान्दसे
महामहसि योगिनां दहरमन्दिरे च स्थितः।

धरादुहितरादरात्तव कृते कपीन्द्रागतिम्
　　प्रतीक्ष्य दिवसान् बहूनवसदृश्यमूके प्रभुः॥ १५॥

रघुकुलपतिना ते लोकनायैव सीते
　　कृतरविसुतसेवः कोऽपि दत्तानुभावः।
वनशिखरिविहारी वानरब्रह्मचारी
　　जलधिमपि ललङ्घेऽजातखेदं ललन् खे॥ १६॥

द्रष्टुं त्वां ननु हनुमन्तमग्निदाहादि
　　आतङ्कं बहुमधिलङ्कमाप्तवन्तम्।
सर्वस्वायितपरिरम्भसौख्यदानात्
　　काकुत्स्थो जननि चकार निर्व्रणं तम्॥ १७॥

दरादुपनतं रमे दशशिरोऽनुजं त्वत्कृते
　　समस्तनयकोविदः सपदि सङ्ग्रहीतुं प्रभुः।
असाधितरिपुस्थलोऽप्यभिषिषेच तं तत्पदे
　　नरः किल समश्नुते न खलु साहसिक्यादृते॥ १८॥

स्त्रीहेतोः प्रथमं निजेन गुरुणा व्युत्पादितं ज्यायसः
　　साम्राज्यानुभवो भवेदनुज इत्येवं विगीतक्रमम्।
सुग्रीवे च विभीषणे च भगवानाम्रेडयामास तं
　　भूमेः पुत्रि भवत्कृते पितृगुणः पुत्रे हि धत्ते पदम्॥ १९॥

देवि त्वदर्थे दयितं नदीनां सतां शरण्यः शरणं स गच्छन्।
कुशेशयाक्षोऽपि कुशेशयत्वं प्राप त्वदावासपदाशयेव॥ २०॥

प्रत्यानेतुमुपागताय भवतीमासन्नलङ्कोषितां
　　वात्सल्यादिव ते वियोगचकितो वारां निधिस्त्वद्गुरुः।
काकुत्स्थाय चिराय मार्गमदिशत् कालाग्निनेवामुना
　　शोणाक्षेण रुषा शुशोषयिषितः सीते शितैः सायकैः॥ २१॥

प्रपात्य महतो गिरीन् प्रसभमन्तरिन्द्रेण यो-
　　ऽप्यधायि वसुधासुते तदनुजस्त्वदर्थं बुधः।

अमुं बहिरिलाधरैरपिदधन्निधिं यादसां
कपिव्रजकरार्पितैः किमिह शेषपूर्तिं व्यधात्॥ २२॥

अङ्घ्र्योरक्ष्णोरपि किल फलं वानराणां नराणाम्
आराद्राशिं तरितुमनसामम्भसामंहसां च।
मानार्हस्त्वामहितभवनान्मानिनीमानिनीषुः
काकुत्स्थोऽसौ जननि विदधे कौतुकात् सेतुकार्यम्॥ २३॥

अन्तर्यः स्फुटमनलेन वारितोऽप्सु विश्वेषां जननि विधातुमेष सेतुम्।
त्वल्लिप्साकुलरघुनाथचोदनातः पाथोधिर्बहिरपि वारितो नलेन॥ २४॥

सेतुं देवि भवत्कृते रघुपतिः सृष्ट्वा जनांश्चापुनात्
एतेषां सगरान्ववायजनुषामेष स्वभावो ध्रुवम्।
स्वर्गादेव भगीरथः पितृकृते भर्गाच्च रोषाविलात्
आनीतैरपुनीत लोकमखिलं गाङ्गैस्तरङ्गैः कृती॥ २५॥

प्रभोरलङ्कोपनिरोधमम्ब कृतापराधेऽपि करिष्यसीति।
लङ्कोपरोधं रघुवीरदासा हन्त त्वदर्थं हरयो वितेनुः॥ २६॥

प्रीतिं निनीषुः प्रियदेवतां त्वां समुद्रतीरे हि चरन् स रामः।
महाहवं मैथिलि वर्धयिष्यन्नयोमुखेन व्यलुनात् पलाशान्॥ २७॥

त्वल्लिप्सयैव धर्मेष्वासक्तो विप्रयोगिवद्व्यसनी ।
काञ्चन दानसमृद्धिं भुवि वरदेविप्रहस्तमनयदिनः॥ २८॥

सदस्युदारेऽप्यतिकायमान महालये सत्यभितो रणाग्रे।
जयश्रिया हन्त बलाद्वृतोऽपि त्वय्येव विन्यस्तमनाः स नाथः॥ २९॥

विष्णुः स्वयं त्वद्विरहासहिष्णुरपांसुले हंसकुलावतंसः।
तपस्वरूपस्य कृतप्रभेदं निनिन्द भूनन्दिनि मेघनादम्॥ ३०॥

उच्चैरावणसहभूः कुम्भस्तव कुम्भिनीतनये।
सद्यस्तनवैरीति क्रोधादेनं जघान रघुनाथः॥ ३१॥

लोकव्रातालम्भकं कुम्भकर्णं लुम्पन्नम्ब त्वत्कृते रामचन्द्रः।
अर्थादेष त्वज्जनन्या धरण्या भारं भूरिं देवि दूरीचकार॥ ३२ ॥

निर्णीय भूयस्तरपुण्यलभ्यं रामः क्ष्मापुत्रि समागमं ते।
नीत्वाहवं पुण्यजनाननेकान् अकारयत् स्वर्वनिताविवाहम्॥ ३३ ॥

धर्मं हि पूर्वमवलम्ब्य कृते जनन्याः कालं निनाय कुतुकादधिकाननं यः।
देवि त्वदर्थमवलम्ब्य तमेव रामः कालं निनाय पुनरप्यधिकाननं सः॥ ३४ ॥

पापपञ्चकनिरासहेतुना सेतुना तव कृते महीसुते।
एत्य पापदशकं विनाशयन्नीशिता चतुरतामदर्शयत्॥ ३५ ॥

परमार्थयितुं हुताशनाच्छ्रियमिच्छेदिति साधुभाषितम्।
भवतीं श्रियमम्ब पावकाज्जगृहे जानकि लक्ष्मणाग्रजः॥ ३६ ॥

प्राणव्ययं कृतवतः प्लवगांस्त्वदर्थे
　　भूयोऽपि जानकि जिजीवयिषुः स रामः।
वव्रे वरं त्रिजगतां वरदोऽपि देवात्
　　कार्यार्थिनो हि पुरुषस्य कुतोऽवलेपः॥ ३७ ॥

काकुत्स्थः कमनीयभूषणमणिक्षौमाग्र्यहेमादिभिः
　　तोषं देवि निनाय वानरभटांस्त्वत्कार्यधुर्यान् प्रभुः।
एतद् युक्तमिदं तु विस्मयकरं यत् सर्वनिर्वाहिणे
　　रङ्गं हन्त विभीषणाय दिदिशे रत्नादियोग्याय सः॥ ३८ ॥

अवतारान् दश भगवानपत्यभूतं जगत् समस्तं ते।
त्रातुं मातरकार्षीत्त्वदिष्टकरणादृते न तस्य फलम्॥ ३९ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रयत्नस्तबकः ॥